শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীকৃষ্ণমঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীকৃষ্ণমঙ্গলম্ ॥

মঙ্গলং বালকৃষ্ণায দিৱ্যলীলায মঙ্গলম্।
মঙ্গলং নীলৱর্ণায মাতৃমান্যায মঙ্গলম্॥ **1** ॥

মঙ্গলং রুক্মিণীশায জগদীশায মঙ্গলম্।
মঙ্গলং যদুনাথায দীননাথায মঙ্গলম্॥ **2** ॥

মঙ্গলং দেৱদেৱায ৱাসুদেৱায মঙ্গলম্।
মঙ্গলং নন্দপুত্রায সদানন্দায মঙ্গলম্॥ **3** ॥

মঙ্গলং পূতনাহন্ত্রে লীলামর্ত্যায মঙ্গলম্।
মঙ্গলং শকটচ্ছেত্রে পদ্মপাদায মঙ্গলম্॥ **4** ॥

মঙ্গলং ৱৎসপালায ৱিশ্ৱপালায মঙ্গলম্।
মঙ্গলং যোগিমৃগ্যায গোপমিত্রায মঙ্গলম্॥ **5** ॥

মঙ্গলং বালগোপায ব্রহ্মৱিদ্যায মঙ্গলম্।
মঙ্গলং কমলাভর্ত্রে গোপীকান্তায মঙ্গলম্॥ **6** ॥

মঙ্গলং মাতৃবদ্ধায জডঘ্নাযাস্তু মঙ্গলম্।
মঙ্গলং ক্রীডতে স্ত্রীভিঃ কুন্দারূঢায মঙ্গলম্॥ **7** ॥

মঙ্গলং দ্ৱিষতে ক্রূরান্ প্রিযাক্রূরায মঙ্গলম্।
মঙ্গলং ৱল্লৱীভর্ত্রে কংসঘ্নাযাস্তু মঙ্গলম্॥ **8** ॥

মঙ্গলং প্রীতভক্তায ৱিদ্যাৱাসায মঙ্গলম্।
মঙ্গলং মাগধজিতে দ্ৱারকেশায মঙ্গলম্॥ **9** ॥

মঙ্গলং পার্থসুহৃদে জিতদৈত্যায মঙ্গলম্।
মঙ্গলং রুক্মিণীজানে রুক্মিণীশায মঙ্গলম্॥ **10**॥

মঙ্গলং নৈকরূপায নরদৈত্যায মঙ্গলম্।
পুত্রিণে নিত্যরূপায ব্রহ্মাচার্যায মঙ্গলম্॥ **11**॥

মঙ্গলং দ্রৌপদীড্যায মানদাযাস্তু মঙ্গলম্।
মঙ্গলং প্রিযভক্তায ভক্তপালায মঙ্গলম্॥ **12**॥

মঙ্গলং দিশতে কামান্ ৱিপ্রপ্রার্থ্যায মঙ্গলম্।
মঙ্গলং শিষ্টপালায ভারঘ্নাযাস্তু মঙ্গলম্॥ **13**॥

মঙ্গলং মাযিনেঽমাযসারথ্যাযাস্তু মঙ্গলম্।
মঙ্গলং পূর্ণরূপায গীতাচার্যায মঙ্গলম্॥ **14**॥

মঙ্গলং ৱিশ্ৱরূপায যোগিধ্যেযায মঙ্গলম্।
মঙ্গলং ৱিশ্ৱগুরৱে কৃপাৱাসায মঙ্গলম্॥ **15**॥

মঙ্গলং জ্ঞানরূপায সর্ৱাভিজ্ঞায মঙ্গলম্।
মঙ্গলং সর্ৱশক্তায মহাসত্ত্ৱায মঙ্গলম্॥ **16**॥

মঙ্গলং দিৱ্যৱীর্যায মাহেশ্ৱর্যায মঙ্গলম্।
মঙ্গলং তেঽচ্যুতায সৎকুলত্রাণায মঙ্গলম্॥ **17**॥

॥ ইতি শ্রীকৃষ্ণমঙ্গলং সমাপ্তম্॥